-२ चैत्र-आषाढ़ २०५०-५१ मार्च-जून, १९९४

विश्व-संस्कृतम्

विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम्
...श्रमः, होश्यारपुरम्-१४६ ०२१ (पंजाब)

... आजीवन-ग्राहक-व्यक्तिभ्यः १०० रूप्यकाणि
...ाजीवन-ग्राहक-संस्थाभ्यः १५० रूप्यकाणि
...: भारते रू० १२) विदेशे । ४ $

अनुक्रमणिकाकारस्य परिचयः

डॉ० वेदप्रकाशः 'वाचस्पतिः'

जन्म	२५ अगस्त १९२१, कोट अद्दू, जि. मुज़फ़्फ़रगढ़ (प. पंजाब)
शिक्षा	विद्यावाचस्पति, शास्त्री, एम. ए., एम. ओ. एल., पी-एच. डी.
सेवाकार्य	प्राध्यापक/आचार्य : दयानन्द ब्राह्ममहाविद्यालय, लाहौर/श्याम-चौरासी (होश्यारपुर) : १९४४-५० ; संस्कृत-प्राध्यापक : डी. ए. वी. कालेज, जालन्धर / गवर्नमैण्ट कालेज, धर्मशाला (कांगड़ा) / मुक्तसर / चण्डीगढ़ / नाभा / संगरूर : अक्त. १९५०-अग. १९७९ ; उपसम्पादक : 'प्राचीज्योतिः', कुरुक्षेत्र विश्वविद्यालय, कुरुक्षेत्र : १९६३-६४ ; सहसंचालक : विश्वेश्वरानन्द वैदिक शोध संस्थान, होश्यारपुर : सितं. १९७९-मार्च १९९० ; सम्पादक : त्रैमासिक 'विश्वसंस्कृतम्', होश्यारपुर : १९८०-९० ; सम्पादक : मासिक 'विश्वज्योति', होश्यारपुर : १९८१-९०.
शोधकार्य	'संस्कृत-वाक्यरचना : भाषावैज्ञानिक एवं व्याकरणिक अध्ययन'
रचना-कार्य	
i. प्रकाशित	'संस्कृत-प्रकाशः', १, २, ३. 'महाभाष्य-प्रकाशना' (आह्निक १, २). 'नवनीतम्' 'विश्वसंस्कृतस्य प्रथमाऽनुक्रमणिका' शोधपरक, साहित्यिक, सामयिक निबन्ध, कहानी आदि (हिन्दी, संस्कृत, अंग्रेजी में) : २५० से अधिक.
ii. प्रकाशन-योजनाधीन	'संस्कृत-वाक्यरचना' 'संस्कृत-शिक्षण की क्रमिका सरणि'

□

३१. १-२ चैत्र-आषाढ २०५०-५१ मार्च-जून, १९९४

विश्वसंस्कृतस्य प्रथमाऽनुक्रमणिका

सा च

कार्त्तिक-२०२० (वि०)-तः पौष-२०४५ (वि०)-पर्यन्ता

पञ्चविंशति-वर्ष-परका

First Index to

VISHVA-SAMSKRITAM

Covering First 25 Years

from November 1963 to December, 1988

डॉ० वेदप्रकाशः 'वाचस्पतिः'

विद्यावाचस्पतिः, शास्त्री, एम०ए०, एम०ओ०एल०, पी-एच०डी०,
पी०ई०एस० (से०-नि०)

विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम्

होश्यारपुरम् (पंजाब)



समर्पणम्

अयि

आचार्य-प्रवर !

डॉ० विश्वबन्धु-शास्त्रिन् !

पद्मभूषण

एम०ए०, एम०ओ०एल०, डी०लिट्०, ओ०डि०ए० (फ्रांस),

के-टि० सि० टि० (इटली)

'विश्वसंस्कृतस्य' संस्थापक-सम्पादक !

त्वदीयं वस्तु, आचार्य्य !

तुभ्यमेव समर्पये !!!

—वेदप्रकाशः 'वाचस्पतिः'

संक्षेप-सूची

अनु.	अनुवादः/अनुवादकः
अनू.	अनूदितः/-ता/-तम्
आन्ध्र.	आन्ध्र-प्रदेशः
उ-प्र.	उत्तर-प्रदेशः
क	कथा (गद्यमयी)
कु.	कुमारी
ग	गद्यम्
ग-का	गद्यकाव्यम्
गी	गीतम्/गीतिका
गी-ना	गीति-नाटिका
ज-का	जम्मू-काश्मीर-प्रदेशः
डा.	डाक्टर
द्र.	द्रष्टव्यः/-व्या/-व्यम्
ना	नाटकम्
नि	निबन्धः (गद्यमयः)
पं.	पण्डितः
प	पद्यम्
प-क	पद्यमयी कथा
प-जर्मनी	पश्चिम-जर्मनी
प-सं	पद्यमयः संलापः
पु-स	पुस्तक-समीक्षा
पृ.	पृष्ठम्/पृष्ठे
प्रका.	प्रकाशकः
प्रा.	प्राध्यापकः
प्रि.	प्रिंसिपल
प्रो.	प्रोफैसर
ब्र.	ब्रह्मचारी
मध्य-प्र.	मध्य-प्रदेशः
म-म	महामहोपाध्यायः
मूल-रच.	मूल-रचना/मूल-रचनाकारः
रच.	रचना/रचनाकारः/रचयिता/रचयित्री
राज.	राजस्थान-प्रदेशः
रा-ब.	रायबहादुर
रूपा.	रूपान्तरम्/रूपान्तरकारः
वि-सं.	विश्वसंस्कृतम्
व्या.	व्याख्याकारः
श्री	श्रीयुतः/श्रीमान्
सं	संलापः
संक.	संकलयिता
स-पू	समस्यापूर्तिः
सम्पा.	सम्पादकः/सम्पादकीयम्/सम्पादितः/-ता/-तम्
सह-रच.	सह-रचना/सह-रचनाकारः
स्वा.	स्वामी
हरि.	हरियाणा-प्रदेशः
हि-प्र.	हिमाचल-प्रदेशः

सम्पादकीयम्

न खल्विदं तिरोहितं कथ्यं तथ्यं यत् सैषा **'विश्वसंस्कृतम्'** इत्यभिधेया पत्रिका विगत-त्रिंशद्-वत्सरेभ्यो निरन्तरायं प्राकाश्यं भजमाना स्वीयेनाकार-प्रकारेण, पृष्ठसंख्यया वरेण्यावरणेन, विविध-विषय-विशेष-विवेचन-वैचित्र्येण च सचेतसां पाठकानां सन्ततं स्वान्तानि सन्तोषयति।

तथा चाऽस्याः पत्रिकाया यदा तदा मुद्रणमुपानीयमाना नानारूपा विशेषाङ्का न केवलं सामान्यानां पाठकानां, किं तर्हि सूक्ष्मेक्षिकाजुषां विदुषां समीक्षकाणां चाऽपि प्रसत्तये कल्पन्ते।

इत्थङ्कारं सुरसरस्वति-संसेवनसंरताः **'प्रो० एस्० भास्करन्-नायर'**-निदेशक-महाभागैः सर्वतोभावेनोपोद्वल्यमाना, आजीवन-सदस्यतादि-सौगम्य-सम्प्रदायिनी सेयं पत्रिका उत्तरोत्तरं पाठकानां रुच्यानुकूल्य-सहिताय हिताय प्रयतमाना किमप्यदृष्टपूर्वं कौतुकावहं समस्तं शस्तं वस्तु प्रस्तौति।

तनु कैमर्थ्यमस्या विषय-विशेषादि-सूची-सम्बन्धिन्या रचनाया इति विषये समेषां **'विश्वसंस्कृत'**-पत्रिकायाः पाठकानां चेतस्सु पिपृच्छिषा सहसा निसर्गत एवाङ्कुरिता जायते। बुभुत्सूनां तेषां कृते तदेवाऽधिकृत्य प्रति-विवक्षामस्तावद् वैशद्येन।

विदितमेवेदं श्रीभृतां यत् संस्थानेऽत्र पत्रिका-त्रिकं सम्पाद्य प्राकाश्यं नीयते। तत्राद्या **'विश्व-ज्योति'** इत्याख्या पत्रिका सांस्कृतिक-धार्मिक-दार्शनिक-सामाजिक-राष्ट्रभावना-परकाद्यनुसन्धानात्मकैः प्रबन्धैः सात्त्विकोदात्तभावानु-पोद्बलयन्ती काव्यरस-रहस्यान्यप्याविष्कृत्य प्रातिस्विकं गरिमाणं ख्यापयति। द्वितीया **'विश्वसंस्कृतम्'** इत्यभिधाना वैदिकसाहित्यिक-दार्शनिक-प्रमुखैः शोधा-त्मकैर् विषयैः परिष्कृता काव्य-नाटकादीन्यपि प्रत्यङ्कं प्रस्तौति। तृतीया च **'विश्वेश्वरानन्द इण्डोलोजिकल जर्नल'** इति व्यपदेशं भजन्ती विश्वविश्रुतिं बिभ्राणाऽस्मत्पत्रिका (तदात्वे पञ्चाबविश्वविद्यालयाधीना) पुरातन-भारतीया-नुच्चावचान् विषयानुपजीव्य गभीरिम-गरिम-गर्भं गवेषणमनुतिष्ठन्ती वत्सरा-र्धान्तरालेन प्राकाश्यं लभमानाऽनुसन्धित्सूनां साचिव्याय च व्यवस्यन्ती विशिष्टं विश्वबन्धुत्वमिवाविष्करोति।

एवं स्थिते पत्रिकास्वेतासु प्रकाशतां प्राप्तानां उच्चावचानां विषयाणां विवरणात्मिकाऽनुक्रमणी सुचिरमपेक्ष्यताऽनुसन्धित्सुभिरिति तेषां सौकर्याय साह्य-सम्पादनाय च पूर्वं तावत् सूक्ष्मेक्षिका-जुषा विदुषा **डॉ० के० वी०-शर्मणा** 'विश्वेश्वरानन्द इण्डोलोजिकल जर्नल' इति पत्रिकायां १९६३-तमाद् ईसवीय-संवत्सरादारभ्य १९७२-ई०-संवत्सर-पर्यन्तं दश-वर्षाऽवधिके काले मुद्रीकृतानां विविध-विषयाणां विशद-विवरण-विभूषिताऽनुक्रमणी 'Decennial Index to Vishveshvaranand Indological Journal' इति नाम्ना प्राणीयत। अन्वक् च विद्याविशिष्ट-शिष्ट-गोष्ठीषु लब्धप्रतिष्ठेन **डॉ० त्रिलोचन-सिंह-बिन्द्रा-**महाभागेन तस्यामेव पत्रिकायां १९७३-तमाद् ई०-वत्सरादुपक्रम्य १९८२ ई०-वर्षावधिके दशवर्षात्मके समये मुद्रितानां विषयादीनां वैमल्यं व्यञ्जयन्ती सुव्यक्ता सूची सन्दृब्धा समपद्यत।

तयैव रीत्याऽनन्तरोद्दिष्टयोः सङ्कलयित्रोः पदैः प्रहतायां पदव्यां भूयसा पदे निदधानेन दीर्घ-दर्शनेन **डॉ० वेदप्रकाशेन** विद्यावाचस्पतिनाऽपि 'विश्वसंस्कृतम्' इत्याख्यायां पत्रिकायां १९६३-तमाद् ईसवीय-संवत्सरात् (आ पत्रिकाया जन्मन इत्यर्थः) प्रारभ्य १९८८-ई०-वर्षाऽवधिके पञ्चविंशति-वत्सरात्मकेऽनेहसि मुद्रितान् तांस्तान् विषयान् पिण्डीकृत्य प्रस्तुत-विषयाद्यनुक्रमणी परिकल्पिता।

तथात्वेऽपि प्रकृताऽनुक्रमणिकायां प्रशस्यं यशस्यं च वैशिष्ट्यं निरूप्यते। तथा हि—इह तावन्निरवशेषाणां रचनानां शीर्षकोल्लेखैः सत्रा तत्सम्बद्ध-गद्य-पद्य-नाटक-समस्यापूर्ति-पुस्तकसमीक्षा-निबन्ध-लघुकथा-प्रभृति-साहित्यिक - विधानामपि सुव्यक्तमुद्देशः, यः किल पूर्वोक्ताऽनुक्रमणिका-द्विके सुदुर्लभः।

अत्रोच्चावचासु रचनासु प्रपञ्चितांस्तांस्तान् विषयान् पञ्चविंशति-वर्गेषु विशकलय्य प्रत्येकं रचनां च तत्संबद्धे वर्गे प्रतिपाद्य 'विषय-सारणी' इत्यधिवचनं याथार्थ्येनाऽन्वर्थतामनायि।

सैषा विशद-विषय-सारणी वाञ्छिताऽनुसन्धान-व्यापार—प्रवृत्तैर् द्राघिष्ठात् कालात् प्रतीक्षिता नैयत्येन शोधकर्मणि दत्तहस्तावलम्बा सम्पत्स्यत इति नात्र तनीयस्यपि विचिकित्सा।

इह तावत् क्वाचित्कोऽक्षरयोजक-मुद्रणयन्त्रादिनिबन्धन आदीनवस्तु दयानदीनैर् मृदु-मानसैर् मर्षणीयो मनीषिभिरिति स-कपोतहस्तं प्रार्थयामहे।

तथाऽपि सैषा रोचना रचना यथाक्षमं यथासंस्थं च भाषादृशा परिष्कृत्य प्राकाश्यं नीयमाना याथार्थ्यजुषां विवेकिनां जिज्ञासाऽपनोदाय प्रमोदाय च नूनं कल्पिष्यत इत्यप्रस्तुतवस्तु-भूयस्त्व-भयादुदास्यत इति विनिवेदयन्—

विनीतः —श्यामदेवः पाराशरः (सम्पादकः)

प्राक्कथनम्

'विश्वसंस्कृतस्य' प्रवर्त्तनम्, प्रवर्त्तकश्च

"भावत्क उत्साहः सदैव नव-नवम् अग्ररूपं प्रस्तौति—इत्येतत् तु भवतो 'विश्वसंस्कृत'-पत्रिकायाः प्रकाशन-योजनैव प्रमाणयति। अस्याः पत्रिकायाः माध्यमेन प्रस्तोतुं भवता प्रतिज्ञाता नवा चिन्तनधारा, नवा च शैली, नूनं नूतन-प्राण-प्रतिष्ठां विधास्यति संस्कृते, यत् खलु संस्कृतं विश्व-जनीन-संस्कृतेः अप्रतिमं वाहनमिव जगति प्रतिष्ठितम्"।[1]

'विश्वसंस्कृत'-पत्रिकायाः प्रवर्त्तनाऽवसरे प्राप्तानां सन्देशानाम् अन्यतमस्मिन् अस्मिन् सन्देशे माननीयेन श्रीमता चिन्तामणि-देशमुखेन आचार्य-विश्वबन्धुं सम्बोध्य इत्थम् आशंसितम् आसीत्।

२०२०-तमे विक्रमाब्दे, तदनुसारिणि १९६३-तमे ईसाब्दे, आचार्य-विश्वबन्धुः पञ्जाब-प्रदेशस्य होश्यारपुर-नगरे विश्वेश्वरानन्द-वैदिक-शोध-संस्थाने 'विश्वसंस्कृतम्' नामैतां संस्कृत-पत्रिकां प्रावर्त्तयत्।

विश्वविख्यातस्य विश्वेश्वरानन्द-वैदिक-शोध-संस्थानस्य संचालक-पदम् अलङ्कुर्वाणो वेदविद्याविशारदो वाग्मी शोधकारशिरोमणिः आचार्य-विश्वबन्धुः

---

1. C. D. Deshmukh (Delfii) :-

"..... That your enthusiasm has always a fresh edge is evidenced by your project to publish 'Vishva-Samskritam'. The new thoughts and new style that you promise for this journal will surely put new life into the unique vehicle of universal culture that Sanskrit is."

—वि-सं., I. i, p. (i)

नैकेषां सारस्वत-साहित्यिक-शैक्षणिक-सामाजिक-समारम्भाणां प्रवर्त्तकः प्रेरकश्चाऽऽसीत्। असावेव प्रेरणा-पुरुषो 'विश्वसंस्कृत'-पत्रिकाया अपि संस्थापक-सम्पादकोऽभूत्।

पृष्ठभूमिः

गत-शताब्द्यां यदा महर्षि-दयानन्दः सांस्कृतिकीं सामाजिकीं च नवचेतनां प्रावर्त्तयत्, तदा वैदिक-विचारधारायाम्, आर्य-संस्कृतौ, प्राचीनपरम्परासु च भारतीय-जनानाम् अगाधा श्रद्धा पुनरुदियाय। संस्कृताऽध्ययने, वेदानुशीलने च जन-सामान्यस्याऽपि नव-नवा रुचिः, नवोत्साहश्चाऽऽविरभूताम्।

एतद्रूपया नव-जागरण-चेतनया पूरित-मानसौ स्वनामधन्यौ स्वामिनौ विश्वेश्वरानन्द-नित्यानन्द-प्रवरौ अविद्यमानपूर्वं 'वैदिककोषं' निर्मातुं १९०३-तमे ईसाब्दे शिमला-नगरे पर्वतीय-सुषमा-मण्डिते 'शान्तकुटी'-नाम्नि स्वनिवास-स्थाने सायुज्येन प्रवृत्तावभूताम्। कतिपयैरेव च वर्षैः वेदचतुष्टयस्य पदानुक्रमणिकां, भावि-वैदिककोषस्याऽऽधारभूतां, विरच्य, वैदिकशब्दार्थकोष-रचनाकार्यं निरन्तरम् अन्ववर्त्तेताम्। दौर्भाग्यात् १९१४-तमे ईसाब्दे स्वामिनि नित्यानन्दे परमं पदम् अवाप्ते, स्वामी विश्वेश्वरानन्दः सर्वथा एकाक्येव तदनन्तरं दशवर्षाणि कोषरचनाकार्यम् अन्वतिष्ठत्।

विश्वेश्वरानन्द-वैदिक-शोध-संस्थानस्य स्थापना

गच्छता कालेन वयसि वर्धमाने, स्वामी विश्वेश्वरानन्दोऽतिशयेनाऽऽत्मनो वार्धक्यम् अनुभवन्, कमपि यवीयांसं विद्वांसं 'वैदिककोष'-निर्माणकार्ये नियोक्तुं मतिं चकार। निज-भक्तेन आर्यसामाजिक-महापुरुषेण आर्यसंस्कृति-पोषकेण रायबहादुर-मूलराज-महोदयेन सह संमन्त्र्य, स्वामी विश्वेश्वरानन्दः १९२३-तमाब्दस्याऽन्तिमे मासे लाहौर-नगरं प्राप्तवान्। तत्र च डी०ए०वी०-शिक्षाऽऽन्दोलनस्य सूत्रधारेण महात्मना हंसराज-महाभागेन बोधितः स्वामि-प्रवरो यवीयसे विदुषे वेदाऽध्ययनाऽध्यापन-निरताय मेधाविने तपस्विने आचार्य-विश्वबन्धु-वर्याय 'वैदिककोष'-निर्माणकार्यम् आर्पयत्।

नाऽतिचिरात्प्रागेव[1], आचार्य-विश्वबन्धुः १९१९-तमे ईसाब्दे लाहौर-स्थस्य पञ्जाब-विश्वविद्यालयस्य एम० ए० (संस्कृत)-परीक्षां प्रथम-कक्षया प्रथम-स्थानेन चोत्तीर्य, लब्धाङ्कैर् नवं कीर्ति-मानं स्थापितवानासीत्। अपि च, विदेशे संस्कृतोच्चशिक्षा-प्राप्त्यर्थं भारतीयशासनेन उपहृतां[2] शोधच्छात्र-वृत्तिं राष्ट्रिय-सम्मान-विरुद्धां मत्वा प्रत्यादिष्टवांश्चाऽऽसीत्। [3]प्रत्युत, डी.ए.वी.-सभाया आजीवन-सदस्यतां प्रशस्ततरां इति तां प्रतिपद्य, तन्नियन्त्रणेऽसौ दयानन्द-ब्राह्म-महाविद्यालयं संस्थाप्य, तस्य च आचार्य-पदमधिष्ठाय आर्य-युवकान् संस्कृतभाषां, संस्कृतसाहित्यं, वेदवाङ्मयं च शिक्षयितुम्, अथ धर्मप्रचाराय तान् प्रशिक्षयितुं पवित्रं सेवाव्रतम् अभ्युपगतवांश्चाऽऽसीत्।

तदेवं प्रतिभा-निष्ठा-समर्पणभावना-त्यागवृत्त्यादिभिर् विरलयोगैर् गुणैः सुसम्पन्नः सन्, आचार्यविश्वबन्धुः तदा 'वैदिक कोष'-निर्माण-योजनां स्वामि-विश्वेश्वरानन्दाद् आदरैकवृत्त्यैव[4] प्रत्यपद्यत।

तथा सति १९२४-तमस्य ईसाब्दस्य प्रथम-दिवसे स्वामि-विश्वेश्वरानन्दस्य शुभं नाम पुरस्कृत्य, 'विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम्' इति संघटनम् आचार्य-विश्वबन्धुः लाहौर-नगरे विधिवद् उदघाटयत्।

संस्थानस्य विस्थापनम्

शिमला-नगरात् समानीतं बीजमात्रं संस्थानमिदं लाहौर-भूमौ रोपितं सत्, प्ररोह-रूपेण दिने दिने प्रवर्धमानं यावता [5]क्षुपाकारम् आधत्ते, तावतैव १९४७-तमे ईसाब्दे, भारत-स्वातन्त्र्य-प्राप्त्यवसरे, पञ्जाब-प्रदेशे द्विधा विभक्ते, लाहौर-नगरे च नव-निर्मित-पाकिस्तान-देशस्य अङ्गतां गते, साम्प्रदायिकैर् महोपद्रवैः प्रसह्य संस्थानमिदं लाहौर-नगराद् विस्थापितम-

---

1. Of late, कुछ ही अर्सा पहले।
2. Offered.
3. On the contrary.
4. Only in an honorary capacity.
5. The size of a small tree, or plant, पौदे का आकार।

प्राक्कथनम्

एम. ए.-छात्राणां शिक्षणे, वैदिकशब्दार्थकोषस्य निर्माणकार्ये, शोध-ग्रन्थानां शोधपत्रिकायाश्च सम्पादने, साहित्यिक-लेखानां निबन्धने, प्रबन्धकीय-प्रकरणेषु चाऽपि प्रा. नायरो निज-क्षमतां प्रदर्शितवान्। तस्य सम्पादन-कला-कौशलेन, संस्कृत-सुभाषितानां याथार्थ्येन आङ्गलभाषया रूपान्तरणे दक्षतया च आवर्जित-चित्तो डा. लुड्विग-स्टर्नबाख़-महोदयः स्व-संकलितस्य विंशति-खण्ड-विस्तृतस्य अति-विपुल-ग्रन्थस्य 'महा-सुभाषित-संग्रहस्य' सम्पादन-भारं श्री-नायराय समर्प्य परां सन्तुष्टिम् अन्वभवत्। मूलतः पोलैण्ड-देशोत्पन्नः, ततो राजनीतिक-परिष्ठिति-वशात् फ्रांस-देशस्य राजधान्यां पैरिस-नगरे निवासम् अधिगतो, डा. लुड्विग-स्टर्नबाख़-महाशयो निज-ग्रन्थस्य 'महासुभाषित-संग्रहस्य' सम्पादन-प्रकाशन-स्तरेण निर्भरं[1] सन्तुष्टः सन्, प्राणान्त-वेलायां सर्वां निज-सम्पत्तिं स्व-साहित्य-सम्पादन-प्रकाशन-हेतवे विश्वेश्वरानन्द-वैदिक-शोध-संस्थाने निहित-प्रशासनाम् अकरोत्।

'विश्वसंस्कृतस्य' उपलब्धयः

संस्थान-संचालितेषु विविध-कार्यकलापेषु अन्यतमं 'विश्वसंस्कृत'-प्रकाशनं नियमेनाऽनुवर्त्तते। अस्य संस्थापक-सम्पादक आचार्य-विश्वबन्धुः 'विश्वसंस्कृतस्य' दिग्दर्शकानि लक्ष्याणि विवृण्वन् सर्वप्रथम एवाऽङ्के निजे-सम्पादकीये एवमाचष्ट—

"अतोऽस्माभिरस्य 'विश्वसंस्कृतस्य' माध्यमेन नित्यं तथा प्रयत्नो विधास्यते, यथाऽभिनवे संस्कृत-वाङ्मये नवनवा विचार-सरणयः पुराणाभिर् मूलायिताभिः परम्पराभिः, स्रोतसां धारा इव स्वोद्गमैः, सन्नद्धा इव सत्यः सुचिरम् अनर्गल-प्रवाहं च प्रवहेयुः"[2]

अथ च

"एवन्नाम युगानुरूपिणीं विश्वव्यापिनीं ज्ञान-विज्ञानाऽऽदान-प्रदान-व्यपेक्षिणीं प्रवृत्तिमनुरुन्धानम् इदम् अस्मदीयं 'विश्वसंस्कृतम्' पत्रं सुरभारती-

---

1. Exceedingly, ख़ूब, अत्यन्त.
2. वि-सं., I. i., पृ. ७.

समाराधन-प्रसङ्गेन पूर्व-पुरुष-दायतयाऽधिगतस्य सांस्कृतिकस्य धनस्य सुरक्षायै समृद्धयै च नूतन-पुरातन-समन्वयैक-दृक् सद्, आकार-प्रकार-वस्तुविषयैर् विशेषं कमपि आदधच्च आत्मनः प्रकाशने प्रवर्त्तते"[1] इति ।

अत्राऽऽचार्येण यद् यद् यथा प्रतिश्रुतं प्रत्याशंसितञ्चाऽऽसीत्, तत् तत् तथैव सम्पन्नं, सम्पद्यते च । वेद-दर्शन-व्याकरण-ज्यौतिषाऽऽयुर्वेद-धर्मशास्त्र-साहित्यशास्त्र-छन्दःशास्त्रादिषु परिनिष्ठितानां, विज्ञान-गणित-भूगोलेति-हास - राजनीतिशास्त्र - समाजशास्त्र - पुरातत्त्वशास्त्र - शिल्प-कला-मनोविज्ञान-शिक्षाशास्त्रादिषु चाऽनेकेषु विद्याक्षेत्रेषु प्रतिष्ठितानां विदुषां प्राचीन-परम्परा-प्रतिपादिकाः, समीक्षात्मिकाः, नूतन-शोधपरकाश्च रचना अस्यां पत्रिकायां प्रकाश्यमानाः सन्ति । नव-साहित्य-सर्जन-रसिकानां साहित्यकाराणां चाऽपि रचनाः सर्वास्वपि साहित्यिक-विधासु——निबन्ध-कविता-गीत-नाटक-कथाऽऽत्म-कथा-जीवनवृत्त-यात्रावर्णन-संस्मरण-हास्य-व्यङ्ग्य-विनोद-रूपासु—— प्राकाश्यं यान्ति । काले कालेऽवसरानुकूला अस्य विशेषाङ्का अपि प्रकाशिता भवन्ति ।

'विश्वसंस्कृतस्य' अनुक्रमणिका

शोधकर्तृणां दृष्ट्या 'विश्वसंस्कृतस्य' अङ्काः सन्दर्भ-ग्रन्था इव महत्त्व-पूर्णा उपयोगिनश्च सन्ति । शोधकर्त्तारः समये समयेऽस्याऽङ्कानां पृष्ठानि अधरोत्तरीकुर्वाणा[2] दृश्यन्ते । अस्याः पत्रिकायाः सर्वोपयोग-हिता अनुक्रमणिका चिरकालादेव सर्वैरपेक्ष्यते स्म । अत एव तेषां शोधकर्तृणाम्, अपि च साहित्य-रस-लिप्सूनां, साहाय्यं विधातुम् एषाऽनुक्रमणिका प्रयत्नेन सज्जीकृत्य प्रस्तूयते, येनाऽभीप्सितस्य रचनाकार-विशेषस्य सर्वा रचनाः, अथ चाऽभीप्सिते विषय-विशेषे विभिन्न-रचनाकाराणाम् अनेका रचनाः, सपद्येव विदिताः स्युः ।

'विश्वसंस्कृतस्य' एषा प्रथमाऽनुक्रमणिका १९६३-तमाद् ईसाब्दात् १९८८-तमम् ईसाब्दं यावत् प्रकाशनस्य प्रथमान्येव पञ्चविंशति-वर्षाणि

---

1. वि-सं., I. i., पृ. ८.
2. पलटते हुए ।

प्राक्कथनम्

विश्वसंस्कृतस्य प्रथमां पञ्चविंशति-वर्ष-परकाम् अनुक्रमणिकाम् एतां प्रकाश्य विश्वेश्वरानन्द - वैदिक - शोध - संस्थानस्य अध्यक्षेण सञ्चालक-प्राध्यापकेन विपश्चिता श्रीमता शिवशङ्कर-भास्करन्नायर-महोदयेन पाठकानां शोधकर्तृणाञ्च महद् उपकृतम्। अतोऽस्मै महानुभावाय शतशः साधुवादा धन्यवादाश्च समर्प्यन्ते।

'विश्वसंस्कृतस्य' सम्पादकेन कविरत्नेन डा. श्यामदेवपाराशरेण पाण्डुलिपिशोधनपरामर्शैः साहाय्यकं व्यधायि, सहायकसम्पादकेन श्री पृथुराम-शास्त्रिणा च प्रूफशोधनकार्ये सततं प्रायति, इत्युभाभ्याम् अनुगृहीतोऽयं जनस्ताभ्यां कृतज्ञतां वेदयति।

विश्वेश्वरानन्द-संस्थान-मुद्रणालयस्य प्रबन्धकः कर्मकराश्चाऽपि शुद्ध-मनोरम-मुद्रणे सिद्धहस्ताः प्रशंसार्हाः।

२२७/१५-ए,
चण्डीगढ़—१६० ०१५.
२५ अगस्त, १९९३.

—वेदप्रकाशः 'वाचस्पतिः'

१

रचनाकार-सारणी

(क) अथाऽनुक्रम्यन्तेऽत्र 'विश्वसंस्कृतस्य' रचनाकाराणां नामानि ! सामान्य-भारतीय-परम्पराम् अनुसृत्य तेषाम् अग्रनामान्येव[1] पुरः स्थापितानि, न तु नामान्त्यानि[2], न चाऽपि कुल-नामानि[3] ।

(ख) रचनाकाराणां नाम-निर्देशाऽनन्तरं, प्रत्येकं तेषाम् उपनाम-कुल-नाम-प्रतिष्ठापदादिकं, स्थानादिकं च यथायथम् अन्वेति ।

(ग) ततश्च प्रथमं रचनानां क्रमाङ्काः (अन्ताराष्ट्रिय-रूपाः) निहिताः, तत्पश्चाच्च रचनानां शीर्षकाणि । क्रमाङ्काश्चैते प्रतिरचनं निजानि अभिज्ञान-चिह्नानि[4] इव परिकल्पिताः, येन तास्ता रचनाः तैस्तैः निजैः क्रमाङ्कैः केवलैः परामृश्येरन् उत्तरत्र विषय-सारण्याम् ।

(घ) अत्र प्रतिरचनाकारं रचना-शीर्षकाणि तत्प्रकाशन-कालक्रमेण निर्दिष्टानि ।

(ङ) तदनु, रचना-विधा सपद्येव कोष्ठके संकेतिता ।

(च) तत्परं, रचनाप्रकाशि-पत्रिका-वर्षाऽङ्कौ (नागरी-रूपौ) उल्लिख्य, तत्पार्श्वे एव कोष्ठकान्तर्गतः पत्रिका-पृष्ठाङ्को (नागरी-रूपौ) निवेशितः ।

(छ) अथ च या रचना एकाधिक-खण्डेषु विभक्ता सती, एकाधिकेषु अनुवर्त्तिषु पत्रिकाङ्केषु प्रकाशिताऽभूत्, तस्या रचनायाः प्रथम-खण्डस्य विवरणेन सहितमेव, अनुवर्त्ति-खण्डानाम् अपि विवरणं सर्वम् एकत्रैव समाहृतम् । तस्याः शीर्षकं तु न पुनरुक्तम् ।

---

1. Forename.
2. Last part of the name.
3. Family name, surname.
4. Identification marks.

(ज) या तु रचना रचनाकार-द्वयेन सहकारितया निबद्धा, तस्या उभावपि सहरचनाकारौ निज-निज-नामाऽनुक्रमेण स्वं स्वम् उपयुक्तं स्थानम् अत्र पृथक्तया उपलभेते। उभयत्र चाऽन्योन्यपरकं रचनाक्रमाङ्कमपि उद्धृत्य, इतरेतर-सन्दर्भो दर्शितः।

अनन्तशर्मा शास्त्री, श्री; कोचीन (केरल-प्रदेशः) :

1. **भारती-ध्वनि-दर्शनम्,** (प), ७. ४ (२१८).

अभिमन्युः, डा. ; शिमला (हि-प्र.)/पटियाला (पंजाब) :

2. **किमु शब्द-साम्यम् उपमा-प्रयोजकम् ?,** (नि), १३. ३-४ (६२-७२).
3. **चमत्कारवादः,** (नि), १८. १ (११-२१).
4. **'गन्धदूतम्'** (श्री परमानन्दशास्त्रि-प्रणीतम्), (पु-स), २१. १ (६१-६२).
5. **'इरा'** (प्रा. देवदत्तभट्टि-प्रणीता), (पु-स), २३. १ (६३-६४).
6. **विश्राम-शब्दस्य साधुत्वाऽसाधुत्व-विचारः,** (नि), २५. २-४ (१७०-१७४).

अभेदानन्द भट्टाचार्यः, डा. ; हरिद्वार (उ-प्र.) :

7. **न्याय-समीक्षा,** (नि), २५. १ (५९-६३).

अमरनाथ शास्त्री, श्री ; होश्यारपुर (पंजाब) :

8. **स्वोपज्ञं पाणिनेः शास्त्रम्,** (नि), २. ३ (२२६-२३६).
9. **'सुगतार्थमाला'** (पं० पेरुन्तानम्-नारायणन्-नम्बूतिरि-प्रणीता), (पु-स), २. ३ (२८६, २९५).
10. **लाजपतरायस्य हिन्दी-हिन्दुत्व-विषया दृष्टिः,** (नि), ३.१ (४७-४९).
11. **चीन-सैन्याऽभिसारः,** (नि), ४.२ (१६८-१७२), ४. ३ (२८१-२८८).
12. **गीतम्,** (गी), ५. ४ (३९६).
13. **ऋत-व्याख्यानम्,** (नि), ७. १-२ (१८-२२).

अयिरूर् माधवन पिल्लै :

14 **विजयते विश्वोत्तरं भारतम्,** (प), १०. १-४ (१२९-१३०).

अयोध्याचन्द्र-दासः, डा. ; पटियाला (पंजाब)/कुरुक्षेत्र (हरियाणा) :

15. ऋग्वेदे पूष-देवताया आध्यात्मिकं स्वरूपम्, (नि), १५. १-२ (७३-७९).
16. वैदिकस्य दस्-धातोः मुख्यार्थः, (नि), १६. ३-४ (४०-५२).
17. उषाः कस्मात्, (नि), २१. २ (९-१६).
18. क्रिया-पद-स्वर-स्थान-विचारः, (नि), २२. १ (३२-४०).
19. कर्मयोग-सिद्धिः, (नि), २४. १-२ (९५-९७).

अयोध्यालालः, श्री ; होश्यारपुर (पंजाब) :

20. किं दूरं व्यवसायिनाम्, (नि), ३.३ (२८४-२८५, २८३).

अरविन्दकुमारः, डा. ; कुरुक्षेत्र (हरियाणा) :

21. सम्प्रदानत्व-लक्षण-विमर्शः, (नि), २१. ३-४ (५७-६३).

अ. वे. सुब्रह्मण्यः, श्री ; बम्बई (महाराष्ट्र) :

22. किमर्थमित्थं परमं प्रहृष्टाः, (प), ५. २ (१३९-१४०).

अशोकचन्द्रः, श्री ; वाराणसी (उ-प्र.) :

23. मानव-समाज-निर्माणे संस्कृतस्य योगदानम्, (नि), ७. ४ (३००-३०८).

आत्माराम शास्त्री, श्री ; वाराणसी (उ-प्र.) :

24. श्रीसन्त-ज्ञानेश्वरमतेन गीतातत्त्वविवेचनम्, (नि), ८. ३ (३-९).

आदित्यनाथः भट्टाचार्यः, डा. ; बर्दवान (बंगाल) :

25. आत्म-तत्त्व-समीक्षा, (प), १७. ४ (८-११), १७. ५ (२२-२४), १८. १ (३०-३४), १८. २ (११-१४).
26. मनूक्तं महदौषधम्, (नि), १९. ३ (१८-२४).
27. प्रमास्वरूपे न्याय-मीमांसा-वेदान्तानां तुलनात्मकमध्ययनम्, (नि), २१. १ (२५-३९).
28. करणत्व-विमर्शः, (नि), २५.२-४ (९९-११५).

आनन्द-कौसल्यायनः, भदन्तः ; कल्याणी (श्रीलङ्का-देशः) :

29. विलक्षणोऽयं महान् विटपी, (नि), ३. १ (१९-२१).

आभारश्मिः, कु. :

30. अस्माकं राष्ट्र-भाषा, (नि), ५. २ (१९६-१९८).

आर. रामस्वामी, श्री ; मैसूर (कर्णाटक) :

31. सत्यं रक्षति रक्षितम्, (क), ७. ४ (२३५-२४२).

आशुतोष-शर्मा विश्वासः, श्री ; डिब्रूगढ़ (असम) :

32. श्रीनगरीय-प्राच्य-विद्या-परिषद् -दर्शनम्, (नि), १.१ (४१-४६).

इन्दु बाली, डा., श्रीमती ; मोहाली (पंजाब) :

33. अमूल्यं मौक्तिकम्, (क), (हिन्दी-मूलाद् अनूदितं डा. वेदप्रकाश-वाचस्पतिना), २३. ३-४ (१३).

इन्द्रदत्त उनियालः, प्रा. ; होश्यारपुर (पंजाब) :

34. चार्वाक-दर्शनतत्त्वमीमांसा, (नि), १. १ (३३-४०), १. २ (१७५-१७८), १. ३ (२७३-२७६), १. ४ (३७४-३७९).
35. 'अङ्गुष्ठदानम्' (श्री रामकिशोर मिश्र-प्रणीतं नाटकम्), (पु-स.), १. १ (९६).
36. 'लिङ्गानुशासन-वर्गः' (श्री-मुकुन्द-शर्म-प्रणीतः), (पु-स), १. २ (१९०-१९१).
37. 'नोद्युङ्क्ते, न प्रयुङ्क्ते, चलति न, सहते नैव, नारादुपैति', (स-पू), १. ३ (२३७).
38. 'भेको हहा फणिमुखे ददते चपेटाम्', (स-पू), १. ३ (२३९).
39. जीव्याश्चिरं प्रिय जवाहर ! लोकभूत्यै, (प), १.३ (२४०-२४१).
40. महात्मा हंसराजः, (ग), २. ३ (२६३-२६८).
41. 'काव्य-कुसुमाञ्जलिः', (प), ३. १ (२७).
42. असत्-कार्यवाद-विवेचनम्, (नि), ३. ३ (२५३-२६३).
43. 'सांख्यकारिका सांख्य-रमणीया' (कुरगण्टि-वेंकटरमण-शास्त्रि-प्रणीता), (पु-स), ४. २ (१९७-१९८).
44. अश्वघोषे सांख्यम्, (नि), ५. ३ (२८१-२८८, २८०).
45. संस्कृतम्, (प), ६. २-३ (१०४).
46. सम्पादकीयम् (ग) : आचार्यतो वियुक्ता वयम्, ८. १-२ (१०९-१११).

47. संस्कृतम् अद्य नौमि, (प), ९. १-२ (२).
48. 'व्यञ्जना-विमर्शः' (डा. रविशङ्कर-नागर-प्रणीतः), (पु-स), १५. ३-४ (८७-८८).
49. तन्त्रम्, (नि), १६. १-२ (२७-३७).
50. 'अमृत-मन्थनम्' (महाकाव्यम्) (श्री-स्वयंप्रकाशशास्त्रि-प्रणीतम्), (पु-स) , १६. ३-४ (५३-५५).
51. वास्तुशास्त्रस्य संक्षिप्त-परिचयः, (नि), १७.१-२ (६०-७०).
52. 'वाणीविलसितम्' (श्री किशोरनाथझा-श्री जगन्नाथपाठक-सम्पादितम्), (पु-स) , १७. १-२ (७६-८०).
53. 'श्री भक्तसिंह-चरितम्' (श्री-स्वयंप्रकाशशर्म-प्रणीतम्), (पु-स), १७. १-२ (८०-८३).
54. 'गीतिकादम्बरी' (श्री अमीरचन्द्रशास्त्रि-प्रणीता), (पु-स), १७.१-२ (८३-८६).
55. 'आर्जुन-मालाकारम्' (श्री-चन्दनमुनि-प्रणीतम्), (पु-स), १७. ३ (६६).
56. आचार्यमम्मटभट्टः, (नि), १८. ३ (५३-५७).
57. 'राष्ट्र-दर्पणः' (श्री-लछमनसिंह-अग्रवाल-प्रणीतः), (पु-स), १८. ३ (५९).
58. 'विज्ञानगीतम्' (श्री-लछमनसिंह-अग्रवाल-प्रणीतम्), (पु-स) ; १८. ३. (५९).
59. उपनिषत्-परिचयः, (नि), १८. ४ (५६-६१), १९. १ (५६-६३), १९. ४ (५९-६४), २०. १ (४७-५४), २०. २ (६०-६४), २१. १ (५७-६०), २१. २ (४९-५२).
60. 'नेपाल-साम्राज्योदयम्' (श्री-पशुपतिझा-प्रणीतम्), (पु-स), १८.४ (६४).
61. वसन्तं प्रति, (प), १९. ३ (६५-६७).
62. महर्षि-दयानन्द-प्रतिपादितव्रैतवादे ईश्वरः, (नि), २०. ३-४ (९७-१०४).
63. शब्दार्थ-पुष्प-रचिता सगुणा सुमाला, (प), २०.३-४ (११७-११८).

64. **'काव्य-त्रिवेणी'**— १. 'ऋतुचक्रम्', २. 'गङ्गा-तरङ्गम्', ३. 'गोदा-गौरवम्' (श्री वि. के. छत्रे शास्त्रि-प्रणीता), (पु-स), २१. १ (६२-६४).
65. **सांख्यदर्शने प्रत्यक्ष-प्रमाणम्**, (नि), २२. १ (४९-५७).
66. **'इन्दिराविजयम्'** (अम्बटिपूडि-वेंकटरत्न-प्रणीतम्), (पु-स), २२. १ (६४).
67. **'श्री-गुरुरविदास-शतकम्'** (डा. शिवप्रसादभारद्वाज-प्रणीतम्), (पु-स), २३. १ (६१-६२).
68. **अख्यातिः सांख्यदर्शने**, (नि), २४. १-२ (१०१-१०६).

इन्द्रदेव द्विवेदः, श्री. ; वाराणसी (उ-प्र) :

69. **सुदामा-चरिते गुरुकुल-स्थितानां गृहस्मृतिः**, (प), ७.३ (१६९).

इन्द्रमोहनसिंहः, डा. ; पटियाला (पंजाब) :

70. **मुखं त्वदीयम्**, (गी), २२. ३-४ (८३).
71. **प्रणयगीतम्**, (गी), २३. २ (६३).
72. **विश्वविद्यालययुवतिः**, (ग-का), २४. १-२ (४९-५०).
73. **ग्रीष्मसमयसारः**, (प), २४. १-२ (११७-११८).
74. **प्रेमपीयूषम्**, (नृत्य-नाटिका), २४. ३-४ (१२-२०).
75. **प्रणयगीतम्**, (गी), २५. १ (५८).
76. **श्री चारुदेवो महान् चारुः**, (प), २५. २-४ (१९०).

इन्द्रमोहनसिंहः, श्री ; सागर (मध्य-प्र.) :

77. **भासस्य रूपकाणां स्थानपरिधि-मीमांसा**, (नि), १३.१-२ (३५-३६).

ई. ईश्वरन् नम्पूतिरिः, प्रा. ; त्रिवेन्द्रम् (केरल) :

78. **व्याकरण-दर्शनम्**, (नि), ४. ४ (३३९-३४५).

ई. पी. भरतपिषारटिः, श्री :

79. **कुतः संस्कृतम् अपचितम् ?**, (नि), १७. ४ (३-७).

उदयनाथ झाः 'अशोक', आचार्यः ; सारिसब पाही (मधुबनी, बिहार) :

80. **काव्यविमर्शः**, (नि), ११. १-४ (९६-९७).

81. अनुमानसूत्र-व्याख्यानम्, (नि), १३. १-२ (७६-७७).
82. शारदा-स्तवनम्, (प), १३. ३-४ (३३-३४).
83. व्याकरणशास्त्रे लिङ्गानुशासनस्य परम्परा, (नि), १४. १-२ (५८-५९).
84. दुर्गाशतनामस्तोत्रम्, (प), १५. १-२ (२, ९८).
85. शक्ति-विचारः, (नि), १९. १ (४१-५०), २३. १ (२४-३०).
86. ध्वनितत्त्व-समीक्षा, (नि), २५. १ (१६-२०).

उदयवीरशास्त्री, श्री ; ग़ाज़ियाबाद (उ-प्र) :

87. योगशास्त्र-प्रणेता पतंजलिः, (नि), २. १ (३-१०).
88. नेतृ-मूर्द्धन्यो लाजपतरायः, (नि), ३. १ (५५-५७).
89. आचार्यो भर्तृमित्रः, (नि), ६. २-३ (२२९-२३१).

उपेन्द्रपाण्डेयः, डा. ; वाराणसी (उ-प्र) :

90. विश्वबन्धुत्व-भावना-संवर्धने संस्कृतस्योपयोगः, (नि), २०. १ (२५-२७).

उमाशंकरशर्मा त्रिपाठी, श्री ; वाराणसी (उ-प्र) :

91. अस्पृश्यान्तर्निवेदितम्, (प), ४. ४ (३१८-३२१).

उमेशचन्द्रशर्मा, प्रा. ; पूना (महाराष्ट्र) :

92. ऋग्वेदीयर्षिर् गाथी कौशिकः, (नि), ६. ४ (२८२-२८९).

उषासत्यव्रतः, डा. ; श्रीमती ; दिल्ली :

93. स्वप्नवासवदत्तस्य दाहकोऽभून् न पावकः, (नि), ४. २ (१७३-१७९).

ऋषिरामः, आचार्यः ; ज्वालापुर (उ-प्र) :

94. श्रद्धाञ्जलिः (लाजपतरायं प्रति), (ग), ३. १ (१००).

ए. एस्. वेंकटाचलम्, श्री ; मैसूर (कर्णाटक) :

95. षड्दर्शन-समन्वयः, (प), ६. १ (४४-४७), ६. २-३ (११६-११८), ६. ४ (२९०-२९१).

एच. आर. शैली, डा. :

96. **प्रकीर्णाः,** (प), १७. १-२ (२), १७. ४ (२).

ए. जी. कृष्णा वारियर, डा. ; त्रिवेन्द्रम् (केरल) :

97. **केरलीयसंस्कृतसाहित्यदर्पणः,** (भक्ति-काव्यम्), (नि), १. २ (१६१-१७१).

एन. वि. पि. उण्णित्तिरिः, श्री ; त्रिवेन्द्रम् (केरल) :

98. **शिष्यस्सुतश्च,** (प), (अनू.), (मूल-रच.) केरलीय-वल्लतोरु-नारायणमेनोन् : 'शिष्यनुं मकनुम्', ८. ४ (१२-१६), १०. १-४ (२९-३५).

एन्. सुन्दरम्, श्री ; त्रिवेन्द्रम् (केरल) :

99. **प्रेम,** (क), ८. ३ (१५-१६, १४).

100. **कला वा कलाकारो वा ?,** (क), १०. १-४ (४८-५१).

101. **सुखं हि दुःखान्यनुभूय शोभते,** (क), १३. १-२ (५७-५९).

एम. आर. श्रीधरः, विद्वान् ; होन्नाली (शिमोगा, कर्णाटक) :

102. **गीर्वाणवाणी खलु सेवनीया,** (प), २१. २ (३४).

एम. पी. उण्णिकृष्णः, डाः ; चांगानाचेरी (केरल) :

103. **शिक्षामनोविज्ञाने श्रवणं, मननं, निदिध्यासनं च,** (नि), २३. २ (५७-६३).

एम्. रामकृष्ण भट्टः, प्रा. ; दिल्ली :

104. **संस्कृतं मान्यतां श्रिये,** (प), १. २ (१७३-१७४).

एम्. वी. शशिकला, सुश्री ; मैसूर (कर्णाटक) :

105. **पाणिनिपूर्ववैयाकरणानां वैशिष्ट्यम्,** (नि), १९. ३ (५५-६२).

ए. सुब्बय्य-शास्त्री, प्रा. ; बेंगलूर (कर्णाटक) :

106. **स्वतन्त्र-भारत-दिग्दर्शनम्,** (प), २. ४ (३३६-३३८).

एस्. नीलकण्ठशास्त्री, प्रा. ; त्रिवेन्द्रम् (केरल) :

107. **काव्यस्यात्मा ध्वनिर् इत्यत्र ''इति''-शब्दार्थ-विचारः,** (नि), ६. २-३ (१६१-१६७).

एस्. पाण्डुरंग विट्ठलः, श्री ; तिरुपति (आन्ध्र.) :
108. अप्पय्यदीक्षितः, (नि), २४. १-२ (५१-५२).
109. वेदांगानि, (नि), २५. १ (५-१३).
110. महावैयाकरणो हरिः, (नि), २५. २-४ (१४३-१५४).

एस्. यज्ञेश्वर शास्त्री, श्री ; बम्बई (महाराष्ट्र) :
111. भारतीया संस्कृतिः, (नि), १०. १-४ (१३९-१४२, १४४).

ओंशरणशर्मा, श्री ; बरेली/खुदागंज (उ-प्र) :
112. अस्माकं प्रधानमन्त्रिणः, (प), १३. १-२ (६०-६२).
113. आनन्दवृन्दावनचम्प्वां वत्सलरसः, (नि), १४. ३-४ (६४-६८).
114. सरस्वत्या दैन्यम्, (प), १७. ३ (२).
115. उत्कोच-महिमा, (प), २०. १ (५५-५६).

ओङ्कारनाथ तिवारी, डा. ; गया (बिहार) :
116. ऋग्वेदानुरूपं जीवेश्वर-सम्बन्ध-विचारः, (नि), २५.१ (३५-४२).

ओङ्कारप्रसाद त्रिपाठी, श्री ; अतर्रा (बांदा, उ-प्र) :
117. ईश्वरतः शान्ति-कामना, (प), ६. १ (२).
118. एको रसः करुण एव, (नि), ६. २-३ (१२७-१२९).
119. भूयो जयतु संस्कृता वाणी, (प), ७. १-२ (२).
120. भारत-वैभवम्, (प), ७. ४ (२७९).
121. संस्कृतोत्कर्षाभिलाषः, (प), ९. १-२ (५०).

ओम्प्रकाश ठाकुरः, कविरत्नम् ; दिल्ली :
122. अद्यतनं मानवं प्रति, (प), १९. ४ (२३-२४).

ओम्प्रकाशः पाण्डेयः, डा. ; हरदोई (उ-प्र) :
123. गीतम्, (गी), २२. २ (४०).
124. गीतम्, (गी), २२. ३-४ (८०).
125. गीतम्, (गी), २४. १-२ (५७).
126. त्वां विना शून्यमाभाति मे जीवनम्, (गी), २५. १ (६४).

ओम्प्रकाश शर्मा 'सुबन्धुः', प्रा. ; नाभा (पंजाब) :
127. सन्देश-सन्दोहः, (ग-का), २०. ३-४ (३७).
128. शुल्कम्, (क), २३. ३-४ (१०७).

ओम्प्रकाशः सारस्वतः, डा. ; शिमला (हि-प्र) :

129. हा स्वातन्त्र्य, (प), २२. ३-४ (१०-११).
130. संसार-कपटापणे विप्रलब्धाः, (प), २२. ३-४ (११).
131. क्लर्कः, वृद्धः, पाकेटमार-गुरु-शिष्यौ, मुद्रा, नेता, (प), २२.३-४ (१२).
132. देशे यत्र न ऐक्यम्, (प), २२. ३-४ (३१).
133. भूमिपुत्रम्, (आकाशवाणी-नाटकम्), २४. ३-४ (११३-१२०).

कण्टकार्जुनः, श्री ;

134. अपभाषितावली, (प), १३. ३-४ (८), १४. ३-४ (२).

कपिलदेवः शास्त्री, डा. ; कुरुक्षेत्र (हरियाणा) :

135. भर्तृहरेर्विवर्तवादः, (नि), १. १ (४७-५४, ४०).
136. प्रादय उपसर्गाः, (नि), २. २ (१४८-१५१).
137. चतुर्विधाया वाचः स्वरूप-निर्वृतिः, (नि), २. ४ (३२७-३३५, ३३८).
138. "चत्वारि वाक्परिमिता पदानि" इत्यत्र भर्तृहरिः, (नि), ३. २ (१४४-१५३).
139. वैयाकरणानां स्फोटवादः, (नि), ४. १ (४०-५१, ६८).
140. अग्निदेवस्य विशेषणरूपेण वेदे "अंगिरस्" - शब्दस्यप्रयोगः, (नि), २०. ३-४ (२९-३६).

कमलाप्रसाद मिश्रः, श्री ; लौपेका/लौटोका (फीजी-देशः) :

141. विदेशादागमनम्, (ग-का), २१. २ (५७).
142. सिडनी-नगरे, (प), २२. ३-४ (९६).

कमलेश झाः, प्रा. ; दरभंगा (बिहार) :

143. परमाद्वैतवादः, (नि), २१. ३-४ (८७-८८).

कर्णसिंहः, डा. ; मेरठ (उ-प्र) :

144. गीतिका, (कव्वाली-गी), २०. २ (२).

145. अभिज्ञानशाकुन्तलेऽतिथिदेवत्वं मातृदेवत्वं च, (नि), २०. ३-४ (११९-१२३).
146. सदा सहचरः पन्थाः पान्थानां दृढचेतसाम्, (क), २३.३-४ (१४).
147. वाग्योगविदो डा. चारुदेवशास्त्रिमहाभागाः, (नि), २५. २-४ (१९६-१९७).

कलानाथ शास्त्री, श्री ; जयपुर (राजस्थान) :
148. संस्कृते लोककथा-तन्तवः, (नि), १०. १-४ (६९-७६).
149. मोहभङ्गः, (क), २३. ३-४ (४५-५४).

क. वे. कृष्णमूर्तिशर्मा, श्री ; पुणें (महाराष्ट्र) :
150. कलिवैचित्र्यम्, (प), ८. ४ (३१-३६).
151. शिवस्तुतिः, (प), ९. १-२ (७२).

का. र. वैशम्पायनः, श्री ; (महाराष्ट्र) :
152. खड्ग-लेखनी-संवादः, (प), ८. १-२ (२६).

किशोरनाथझाः, डा. ; दरभङ्गा (बिहार)/इलाहाबाद (उ-प्र) :
153. न्यायभाष्ये शास्त्रान्तर-विमर्शः, (नि), २. ३ (२०१-२०७), २. ४ (३१६-३२६).
154. आचार्योदयनस्य काव्य-प्रतिभा, (नि), ६. ४ (२७०-२८१), ७. १-२ (६३-६८).

कुञ्जबिहारी पाण्डेयः, श्री ; बीकानेर (राज.) :
155. कालिदासीय-काव्येषु चित्रिता स्थितिः, (नि), १५. १-२ (८०-८७).

कुन्दनलालशर्मा, प्रा. ; मुज़फ़्फ़रनगर (उ-प्र) :
156. उर्वशी-पुरूरवसोर् आख्यानम्, (नि), ३. ४ (३२९-३४२).
157. भारतीयं प्रजातन्त्रम्, (नि), ४. ३ (२८९-२९७).
158. संस्कृतेः सङ्कटम्, (नि), ६. २-३ (१५१-१६०).

कुबेरनारायण उपाध्यायः, श्री ; भरवारी (इलाहाबाद, उ-प्र) :
159. प्रह्लादपाठः, (ना), २४. ३-४ (१०८-११०).

कुलभूषणः, डा० ; श्रीनगर (ज-का) :

160. धर्मोपदेष्टा लाजपतः, (नि), ३. १ (८५, ८९).

कृष्णकान्तशुक्लः, प्रा० ; बरेली (उ-प्र) :

161. प्रबोधनम्, (प), ६. ४ (३००).

कृष्णकुमारः, श्री ; होश्यारपुर (पंजाब) :

162. लक्षणायाः स्वरूपम्, (नि), २. ३ (२७६-२७८, २८५).

कृष्णकौशिकः, प्रा० ; सुनाम (पंजाब) :

163. कादम्बरी-गद्यकाव्यस्थ-सुभाषितानि, (ग), २१. १ (५६).

कृष्णकौशिकः, श्री ; पटियाला (पंजाब) :

164. म-म. पं. मथुराप्रसादवीक्षित-विरचितं वीरपृथ्वीराजविजय-नाटकम्, (नि), २२. १ (२७-३०).

कृष्णदेव सारस्वतः, श्री ; रायपुर (मध्य-प्र.) :

165. भिक्षाटनम्, (ना), १३. १-२ (३७-४३).

कृष्णनम्बूद्रो/विव. के. एन्. वासुदेव शर्मा, श्री :

166. अन्तर्वाहिनी, (ना), ८. ३ (२७-५०), ११. १-४ (३-१४).

कृष्णमणित्रिपाठी, श्री ; वाराणसी (उ-प्र.) ;

167. योगस्योपयोगिता-विमर्शः, (नि), ४. २ (१६०-१६४).

कृष्णमुरारि शर्मा, डा. ; होश्यारपुर (पंजाब) :

168. गीतम्, (गी), १०. १-४ (८७).

169. श्रीमद्-अरविन्ददर्शने मानव-नियतिस्वरूपम्, (नि) ११. १-४ (९२-९५).

170. त्वञ्च, अहञ्च, (ग-का), १९. ३ (७८).

171. गीतम्, (गी), १९. ४ (६५).

172. हा रोदिषि किम् भारतमातः, (गी), २०. १ (६४).

173. शंवालोत्सारणस्य मूल्यम्, (ग-का), २०. ३-४ (९५-९६).

KENDRIYA SANSK SRINGERI

कृष्णलालः, डा. ; दिल्ली ;

174. गृह्य-सूत्रेष्व् आपोहिष्ठीय-मन्त्राणां वितियोगः, (नि), ५. २ (१८७-१८९).
175. वेद-महाभारतयोः कृष्णस्य स्वरूपम्, (नि), ७. ४ (२४३-२५२).
176. अन्धत्वेन न हीयते, (क), ८. ४ (२३-३०, ११).
177. उपसर्ग-विषयकोऽद्भुतो ग्रन्थः, (नि), २५. २-४ (१६०-१६२).

कृष्णलाल नादानः, प्रो. ; दिल्ली :

178. अयि भारत-युवक !, (प) १. १ (२१).
179. तमन्तिमं गुरुं भजे, (प), ४. २ (१८२-१८३).

कृष्णवेङ्कटशर्मा/कृ. वें. शर्मा/के. वी. शर्मा, डा. ; होश्यारपुर (पंजाब) :

180. भट्टिकाव्य-वैभवम्, (नि), १.१ (२९-३२).
181. काल्पनिकनामधेयैर्विज्ञाताः केचित् संस्कृत-कवयः, (नि), १. ४ (३६८-३७३).
182. क्षेमेन्द्र-कवेर् अनुपलब्धाः कृतयः, (नि), ३. २ (१३०-१४१).
183. अविज्ञातो महाकविर् मेण्ठराजः, (नि), ३. ४ (३१८-३२५).
184. कश्मीरेषु पण्डित-सभाः, (नि), ४. १ (२३-३१).
185. प्राक्तन-भारते वादकला, (नि), ४. ३ (२२८-२३९).
186. शूद्रकः सूक्तिकारोऽपि, (नि), ५. १ (३-१०).
187. प्राक्तन-भारते पत्र-लेखन-प्रक्रिया, (नि), ५. ३ (२०७-२१८).
188. दक्षिणापथे वेद-प्रचारः, (नि), ६. १ (११-१८).
189. महाकविनीलकण्ठदीक्षितः, (नि), ६. २-३ (१४१-१४८).
190. उपहास-कविर् नीलकण्ठदीक्षितः, (नि), ६. ४ (२९२-२९६).
191. काव्यमीमांसको महाकविर् नीलकण्ठदीक्षितः, (नि), ७. १-२ (९२-९८).
192. बृहद्-भारते महाभारतम्, (नि), ७. ३ (१७०-१७७).
193. प्राचीनभारते चौर्यकला, (नि), ८. १-२ (३-१४).
194. पातंजलं देवदत्त-चरितम्, (नि), ९. १-२ (१८-२४).
195. प्राक्तने भारते ग्रन्थ-सम्पादन-प्रक्रिया, (नि), १९.१ (२६-३२).
196. हस्तलिखितग्रन्थेषु गैरिक-लापन-विधिः, (नि), १९. ३ (४-६).

केदारनाथः, प्रो. ; हिसार (हरियाणा) :

197. श्रेयः प्रेयोऽमृतप्रदं मनोऽम्भोधिमन्थनम्, (नि), १. ४ (३५७-३५९).

केदारनाथ ओझाः, श्री ; पटना/पलरुखी (बिहार) :

198. न्यायस्य प्रामाण्यवादः, (नि), ४. २ (१३६-१४६).
199. जड-प्रकाशयोर् आध्यासिकः सम्बन्धः, (नि), ४.४ (३८०-३८८).
200. माया सर्वदर्शनानुस्यूता, (नि), ५. २ (१३१-१३८).
201. प्रामाण्याऽप्रामाण्ययोः स्वतस्त्ववादः, (नि), ५. ४ (३४९-३५५).
202. प्राचीन-दर्शन-समन्वयः, (नि), १०. १-४ (५२-६१).

के. विजयन्, डा. ; त्रिवेन्द्रम् (केरल) :

203. संस्कृतकाव्यकाराः स्वदेशानुरागश्च, (नि), २१.३-४ (३०-३२).
204. केरलीयानां साङ्केतिक-विद्यापरिश्रमः, (नि), २३. २ (२९-३२).

के. वें. नृ. अप्पारावः, प्रा. ; कोवूर/कोलूर (आन्ध्र.) :

205. जयतु भारताम्बा, (प), १. १. (१७-१८).
206. साम्य-योगः, (प), ९. १-२ (१४२).

केशवचन्द्र दाशः, श्री ; जगन्नाथपुरी (उड़ीसा) :

207. सङ्गत-स्वप्नः (बालानां कृते एकाङ्कि-रूपकम्), (ना), २४.३-४ (६९-७२).

केशवचन्द्र दासः, प्रा. ; सम्बलपुर (उड़ीसा) :

208. आत्मभाष्यम्, (ग-का), २०. ३-४ (१०९-११०).

केशवप्रसादमिश्रः, श्री ;

209. गोतमानां वेदोपबृंहणे योगदानम्, (नि), १०.१-४ (९८-१०२).

केशवराय मुसलगांवकरः, श्री :

210. राष्ट्रं राष्ट्रियता च, (नि), ६. २-३ (१६८-१७०).

केशवशर्मा, श्री ; शिमला (हि-प्र) :

211. कालस् तथाऽनुरागः, (मूल-रच. : 'Time and Love' by Shakespeare), (प), २. ४ (३७२, ३७१).

को. अ. सुब्रह्मण्य अय्यर्, प्रा. ; वाराणसी/लखनऊ (उ-प्र) :
212. भर्तृहरेर् अभिप्रेतः शब्दार्थ-सम्बन्धः, (नि), ४. ३ (२०७-२१९).

कोरड सुब्रह्मण्यम्, डा. ; वाल्टेयर (आन्ध्र.) :
213. अर्थैकत्वादेकं वाक्यम्, (नि), २१. ३-४ (१०५-१०६).

कोविदाचरण द्विवेदी, श्री ; मण्डला (मध्य-प्र.) :
214. विश्व-संस्कृतम्, (प), ५. २ (१९९-२००).

खगेशझाः, श्री ; दरभंगा (बिहार) :
215. राजनीतौ वृद्धसंयोगः, (नि), ७. १-२ (४७-५३).
216. सुखस्य मूलं धर्मः, (नि), ८. १-२ (२७-३४).

गङ्गानाथ झाः 'बुझनुकः', श्री ; बिट्ठो (सरिसव पाही, मधुबनी, बिहार) :
217. सत्तायाः खण्डनम्, (नि), १५. ३-४ (४९-५०), १६. १-२ (६०-६१).
218. शब्दस्य द्रव्यत्व-विचारः, (नि), १७. ४ (३१-३३).

गणपति शुक्लः, पं. ; वड़वानी (मध्य-प्र.) :
219. विद्यादानं महत्तरम्, (क), १. १ (९२).

गणेशदत्त शर्मा, डा. ; मेरठ (उ-प्र) :
220. कालिदास-काव्ये वैदिक-दर्शनम्, (नि), १८. ३ (३१-४२).
221. वैदिकसाहित्ये नारीणां स्थानम्, (नि), १९. ३ (७०-७७), १९. ४ (२५-३२).

गणेशरामः, श्री ; डुंगरपुर (राजस्थान) :
222. संस्कृत-भाषायाः पत्र-कारिताक्रमविकाशः, (नि), ५. १ (६६-७३), ५. २ (१४६-१५६).
223. सापराधः, (क), ९. १-२ (१५०-१५४), ९. ३-४ (२२०-२२८).

गणेशराम शर्मा, श्री ; झालावाड़ (राजस्थान) :
224. प्रत्युत्पन्नमतित्वम्, (ग), १. २ (११५-१२०).
225. विलियमफ़ाकनरः, (अनू.) (मूल-रच. द्रोणवीर कोहली) (ग), १. ४ (३१८-३२३).

226. स्नेहानुरोधः, (क), २. २ (१७०-१७३, १७५), २. ३ (२३८-२४६).
227. भवितव्यम्, (क), ३. ३ (२७८-२८०).
228. लोकसाहित्यकारः सामरसेट-माममहाशयः, (नि), ६. १ (५८-६४).

गिरिजानन्दझाः, श्री ; दरभङ्गा (बिहार) :
229. वाणस्य वैशिष्टयम्, (नि), ५. १ (४१-४६).

गिरिजाप्रसादद्विवेदः, श्री ; अयोध्या (उ-प्र) :
230. अयोध्या-पंचदशी, (प), ५. ४ (३४६-३४८).

गिरिदत्तः पाण्डेयः, श्री ; वाराणसी (उ-प्र) :
231. शास्त्रेषु लोक-प्रामाण्यं न्यायस्वरूपविमर्शश्च, (नि), १२. १-४ (१२३-१३६).

गिरीशचन्द्र ओझा, डा. ; होश्यारपुर (पंजाब) :
232. ध्वनिः काव्यस्यात्मा, (नि), १. २ (१८२-१८५).
233. 'सिनेमा-शतकम्' (श्री-पद्म-ओझा-शास्त्रि-प्रणीतम्), (पु-स), २. २ (१८६-१८७).
234. 'इन्द्रियक्षीयं काव्यम्' (श्रीस्वयंप्रकाशशर्मशास्त्रि - प्रणीतम्), (पु-स), ९. १-२ (१५७-१५८).
235. नानकचन्द्रोदय-महाकाव्यस्य संक्षिप्तः परिचयः, (नि), १८. ४ (१७-२७).
236. भारतीयाचार्याणां सौन्दर्य-दृष्टिः, (नि), १९. ४ (३५-४४).
237. संस्कृतसाहित्ये प्रेम-दर्शनम्, (नि), २०. २ (५४-५९).
238. रक्षन्तु भारतीं नः, (प), २२. ३-४ (२५).

गोपालशास्त्री, श्री ; चमोली (उ-प्र) :
239. नारी, (ना), २. २ (१३२-१३९).

गोपाल शास्त्री, पं. ; ज्योतिर्मठः (उत्तराखण्डम्, उ-प्र) :
240. संस्कृत-संधि-ज्ञानाय सरलतमा रीतिः, (नि), १. १ (८७-८८, ८६).

गो. वि. देवस्थली, डा. ; नासिक (महाराष्ट्र) :

241. रिक्तः सर्वो भवति हि लघुः, पूर्णता गौरवाय, (आक्षेपः) (प), १. २ (१४६).

घनश्याम उनियालः, डा. ; होश्यारपुर (पंजाब) :

242. यण्-सन्धेरागम-रूपत्वम्, (नि), २५. २-४ (१५५-१५९).

घनश्याम नौटियालः, डा. ; होश्यारपुर (पंजाब) :

243. श्रीमद्-दयानन्द-चरितम्, (प), २०. ३-४ (१०५-१०६).
244. दिवंगता हा ! प्रियदर्शिनी सा, (प), २१. ३-४ (१-४).
245. क इह रघुकारे न रमते, (नि), २२. १ (९-१४).
246. भारतीय-साहित्यशास्त्रे वृत्तिविमर्शः, (नि), २२.२ (४९-५९).
247. भारतं भा-रतं भवेत्, (प), २२. ३-४ (२८), २५. १ (२१-२२).
248. यथा गुरुस्तथा शिष्यः, (क), २३. ३-४ (९७-९८).
249. पापस्य जनकः ?, (क), २३. ३-४ (९८-९९).
250. मातुर्भिक्षा, (क), २३. ३-४ (९९-१००).
251. नैषधीयचरितस्य शास्त्रकाव्यत्वम्, (नि), २४.१-२ (१७-३४).

घनश्यामसिंह गुप्तः, श्री ; रायपुर (मध्य-प्र.) :

252. श्रद्धाञ्जलिः (लाजपतरायं प्रति), (ग), ३. १ (९५-९६).

चक्रधारी शास्त्री, श्री ; नूरपुर (हि-प्र) :

253. कृतं प्रयाणं ह्यस्मिन् धरातले, (प), २२. ३-४ (२७).
254. हुतात्मा वज़ीर रामसिंहः पठाणिया, (प), २३.३-४ (६१-६४).
255. सती नीलदेवी, (प), २४. १-२ (९८-१००).
256. भूचालः, (प), २४. १-२ (११२).
257. बलवान् सर्वत्र पूज्यते, (ना), २४. ३-४ (१११-११२).

चन्द्रकान्ता देवी, डा., कु. ; वाराणसी (उ-प्र) :

258. उपनिषदः, (नि), २०. ३-४ (१११-११६).
259. निरुक्तस्य प्रयोजनम्, (नि), २१. ३-४ (७७-७९).
260. अविवेकिनः निर्णयः, (क), २३. ३-४ (१२५-१२६).

चन्द्रदेव शर्मा, श्री ; वेतिया (चम्पारण, बिहार) :

261. तत्संस्कृतं द्रागवलम्बनीयम्, (प), ७. ३ (१८०-१८१).

चन्द्रप्रकाश आर्यः, श्री ; होश्यारपुर (पंजाब) :

262. परा-विद्या, (नि), २. १ (८५-८७, ८४).

चन्द्रिकालाल श्रीवास्तवः, डा, ; गोरखपुर (उ-प्र) :

263. संस्कृत-नाटकेषु प्राकृत-साम्यम्, (नि), २१.३-४ (१०७-११२).

264. संस्कृत नाटकेषु विदूषकस्य स्थितिः, (नि), २३.१ (३३-३९).

चारुदेवः, प्रो., डा. ; दिल्ली/होश्यारपुर (पंजाब) :

265. हासविमुखी राजदारिका, (क), १. १ (७५-७८, ६६).

266. संस्कृतवाग्व्यवहारः, (नि), १. ४ (३२४-३३७).

267. दयाऽऽर्द्रचेताः श्रीलाजपतः, (नि), ३. १ (५२-५४).

268. भट्टिकाव्य-विमर्शः, (नि), ३. ३ (२२६-२४०).

269. पाणिनीयाष्टके काश्चिद् व्यवहार-दिशः, (नि), ४.२ (१०७-११३),

छबीलदासः, प्रि. ; जालन्धर (पंजाब) :

270. श्रद्धाञ्जलिः (लाजपतरायं प्रति), (ग), ३. १ (१००-१०३).

जगतावली सूदः, प्रि., कु. ; होश्यारपुर (पंजाब) :

271. हे नारि !, (नि), १. १. (८०-८२).

272. कलाकारस्याभिनिवेशः, (प), १. २ (१८०).

273. शक्तिर्भक्तिश्चोभे सापेक्षे, (नि), १. ४ (३८१-३८३).

274. देशस्य भीषणसमस्या नारीणां सहयोगश् च, (नि), २. २ (१७७-१७८, १८१).

275. वसन्त-गीतिका, (गी), १२. १-४ (१३७-१३८).

276. सौभाग्यभरा धरा, (प), १४. १-२ (२).

जगत्रवि शास्त्री, श्री :

277. महात्मा हंसराजः, (प), १०. १-४ (६७-६८).

जगदीशचन्द्रः, आचार्य ; जोधपुर (राजस्थान) :

278. सरस्वती-वन्दना, (गी), २२. ३-४ (१९).

279. सङ्गतिः कथय किन्न करोति ?, (क), २३. ३-४ (१२७).

जगदीश झा, पं., व्याकरणाचार्यः ; होश्यारपुर (पंजाब) :

280. **विश्वसंस्कृत-प्रशस्तिः**, (प), १. १ (११).
281. **'दीपमालिका'** (श्री-वासुदेवद्विवेदि-प्रणीता), (पु-स), १. २ (१८९-१९०).
282. **'नोद्युङ्क्ते, न प्रयुङ्क्ते, चलति न, सहते नैव, नारादुपैति'**, (स-पू), १. ३ (२३६).
283. **'काकिण्या तुलनीयतामुपगतः कार्षापणः क्रोशति'**, (स-पू), १. ३ (२३८).
284. **'भेको हहा फणिमुखे ददते चपेटाम्'**, (स-पू), १. ३ (२३८).
285. **अस्तंगतोऽद्य बत भारतसूर्यदेवः**, (प), १. ४ (३१७).
286. **'दारुतामेति वह्निः'**, (स-पू.), १. ४ (३४८).
287. **'विधावुज्जिहानेऽप्यदभ्रा तमिस्रा'**, (स-पू.), १. ४ (३४९).
288. **'भारतं भारतं नो भवेद् भारतम्'**, (स-पू.), १. ४ (३५१).
289. **'धर्माकूतम्'** (श्री-व्यम्बरायमखि-प्रणीतम्), (पु-स), १. ४ (३८९-३९०).
290. **योद्धाऽयं समुपागतः पुनर् अहो ! कालो वसन्तोऽधुना**, (प), २.२ (१६१-१६२).
291. **'जवाहर ज्योतिः'** (श्री ग. प्र. गुप्त-प्रकाशितम्), (पु-स), २. २ (१८३-१८४).
292. **'काव्यकुसुमाञ्जलिः'**, (प), ३. १ (३४-३५).
293. **उद्बोधनम्**, (प), ३. ३ (२२५).
294. **श्रद्धांजलिः** (लालबहादुर-शास्त्रिणे), (प), ४. २ (१५२).
295. **गीतिका**, (प), ७. १-२ (९१).
296. **'रामदास-गीता'** (श्री-रामकृष्णभट्ट-प्रणीता), (पु-स.), ७. १-२ (११८-११९).
297. **उद्बोधनम्**, (प), ९. १-२ (११४-११५).

जगदीशप्रसाद सेमवालः, डा. ; होश्यारपुर (पंजाब) :

298. **यमनचिकेतसीयम्**, (ना), ११. १-४ (४५-५२).
299. **शिक्षा**, (प), १३. १-२ (१७-१९).
300. **रामस्य वैदेहीविरहः**, (प), १५. १-२ (१३-१४).

301. सेयं पंचनदीयभूर् विजयते वेदत्रयीजन्मभूः, (प), १६. १-२ (४२-४३).
302. श्रीदुर्गामहास्तोत्रम्, (प), १७. १-२ (२९-३१), १७. ३ (२८-३४).
303. श्रीरामचरितावली, (प), १८.२ (२३-२६), १८. ३ (२७-३०), १८. ४ (१३-१६).
304. वसन्त-विलासः, (प), १९.१ (६-८), १९. २ (४०-४६), १९. ३ (२५-३१).
305. वसन्तगीतम् (गी), २०. १ (२-३).
306. मेघविलासः, (प), २०. २ (४४-५३), २१. १ (४८-५५).
307. श्रीमद्-दयानन्द-सरस्वतीति, (प), २०. ३-४ (७२-७६).
308. इन्दु-विलासः, (प), २१. २ (२१-२५), २१. ३-४ (११३-१२४).
309. इन्दिरे ! त्वयि त्रिदिवं गतायाम्, (प), २१. ३-४ (५-७).
310. हिमगिरि-विलासः, (प), २२. १ (४१-४८), २२.२ (४१-४८).
311. विडम्बना-विलासः, (प), २२. ३-४ (६५-७९).
312. भानूदय-विलासः, (प), २३. १ (५७), २३. २ (९-२४).
313. सुर-भारती-क्रन्दनम्, (ना), २४. ३-४ (३०-३२).

जगद्रामशर्मा शास्त्री, पं. ; होश्यारपुर (पंजाब) :

314. 'काव्य-कुसुमाञ्जलिः', (प), ३. १ (२६-२७).
315. स नाथो बालानां सततमवतात् सिद्धपदमाक्, (प), ५. ३ (२६३-२६४).

जगन्नाथ रिबू शास्त्री, श्री ; श्रीनगर (ज-का.) :

316. शिव-निर्वाणम्—मङ्गलाचरणम्, (प), ९. ३-४ (२१०-२१९).
317. शान्ति-वनम्, (प), १२. १-४ (११७-१२२).
318. लालबहादुरः शास्त्री, (प), १३. १-२ (७८-८०).
319. भू-स्वर्गः, (प), १४. १-२ (४९-५७), १४. ३-४ (२३-३३).
320. रूपाभवानी, (प), १६. १-२ (२३-२६).
321. मातृवन्दना सप्तपदी, (प), २०. २ (३०-३१).
322. वीरभूर्वीरमाता च, (प), २२. १ (३१).
323. भ्रमरगीत-सुधारस-चन्द्रिका, (प), २२. ३-४ (३३-४१).

जगन्नाथ वेदालङ्कारः, श्री ; पाण्डिचेरी :

324. गीतायाः प्रतीकात्मिका व्याख्या, (नि), ११. १-४ (५९-६४).

जनमेजयः विद्यालंकारः, श्री ; कानपुर (उ-प्र) :

325. ईश्वर-प्रार्थना, (प), ७. ४ (२५३-२५४).

326. चरक-संहिता, (नि), ८. १-२ (१७-२५, ५५).

जनार्दनगङ्गाधररटाटे, श्री ; वाराणसी (उ-प्र) :

327. कविकुलगुरुः कालिदासः, (प), ४. २ (१३५).

328. सुप्रभातम्, (प), ४. ४ (३०४).

जयदत्त उप्रेती शास्त्री, डा. ; अल्मोड़ा (उ-प्र) :

329. स्वर्गाऽपवर्गयोः भेदाऽभेद-विमर्शः, (नि), २१. ३-४ (६८-७६).

जयदत्तशास्त्री, श्री ; जोशीमठ (उ-प्र) :

330. स्वतन्त्र-भारते संस्कृतस्याऽभ्युदयः, (नि), ५. ३ (२७२-२७४).

331. विरल एव विभूति-विभाजनम्, (नि), ७. १-२ (११३-११६).

332. कर्मणि कर्तुः स्वातन्त्र्यम्, न वेत्यत्र विचारः, (नि), १०. १-४ (३६-४७).

333. भाषोत्पत्तिः, (नि), १०. १-४ (१४५-१५४).

334. अथ वेदवर्णितदेवानां स्वरूप-विवेचनम्, (नि), १७. ४ (४१-४६).

जयमन्तमिश्रः, डा. ; मुजफ़्फ़रपुर (बिहार) :

335. पूर्वध्वनि-कालिकानामालङ्कारिकाणां रस-विचारः, (नि), १. ३ (२०१-२०७).

जानकीनाथ कौलः 'कमल', श्री ; श्रीनगर (ज-का) :

336. कुण्डलिनी-शक्तिस्तद्-विषयको योगश्च, (नि), २४. १-२ (४१-४८).

जानकीप्रसाद द्विवेदः, डा. ; वाराणसी (उ-प्र) :

337. कातन्त्र-वाङ्मयम्, (नि), ६. ४ (२४९-२६२), ७. १-२ (३-१७).

338. कातन्त्रीयो गणपाठः, (नि), ९. १-२ (२५-३३), ९. ३-४ (१६७-१७५).

जियावन पाण्डेय, प्रो. ; टांडा (फैज़ाबाद, उ-प्र) :

339. महाकवि-वत्सराज-कृत-रूपकेषु सम्प्राप्तम् इतिहास-सूत्रम्, (नि), १८. २ (३६-४४).

जीतसिंहः खोखरः, डा. ; नाभा (पंजाब) :

340. यौतुकम्, (क), २०. २ (३२).
341. स्वतन्त्रता !, (क), २३. ३-४ (१०९).
342. ३५३७, (क), २३. ३-४ (१२०).
343. पाणिनेः अष्टाध्याय्यामुपर्वर्णिता आचार्याः, (नि), २५. २-४ १२९-१३२).

ज्ञानचन्द्र त्यागी, डा. :

344. श्री गान्धिस्तवनम्, (प), १०. १-४ (२).

ज्योतिर्मित्रः, प्रा. ; वाराणसी (उ-प्र) :

345. वाल्मीकि-रामायणे आयुर्वेद-तत्त्वानि, (नि), ३. २ (१२२-१२९).

टी. एस्. श्रीनिवास शास्त्री, श्री ; पूना (महाराष्ट्र) :

346. न्याय-वैशेषिक-मतयोः श्रुति-स्मृति-स्वरूपम्, (नि), ५. २ (१५८-१६७).

टी. के. गोपालस्वामी आयंगरः, प्रा. ; तिरुपति (आन्ध्र.) :

347. कालिदासस्य प्रकृति-विषये भावना, (नि), २. १ (११-१६).
348. संस्कृत-नाटकानां वैशिष्ट्यम्, (नि), २. ४ (३१०-३१४).
349. महाकवि-माघस्य वैदुष्यम्, (नि), ४. १ (३२-३८).
350. कथं मृत्पिण्ड-बुद्धिः शाकुन्तले विदूषकः, (नि), ४. ४ (३२२-३२६).
351. प्रस्थान-त्रय-तत्त्वदर्शी कालिदासः, (नि), ५. २ (१२४-१३०, १३८).
352. वेंकटपदनिरुक्तिः, (नि), ८. ४ (३-८).

टी. वी. परमेश्वरः अय्यरः. पं. ; दिल्ली :

353. लेखनी-स्तवः, (प), २२. ३-४ (८).
354. मन्दस्मितम्, (प), २२. ३-४ (३१).

355. निन्दा विपत्कारणम्, (प-क), २३. ३-४ (१२१-१२४).
356. बसयाने, (प), २५. १ (५७-५८).
357. प्राप स्वर्गमभीमचारुचरितः श्रीचारुदेवः सुधीः, (प), २५. २-४ (३९-४२).

ठाकुदत्त जोशी, डा. ; जोधपुर (राजस्थान) :

358. लक्षणा-विमर्शः, (नि), २१. ३-४ (३३-४०).

डी. एन. दीक्षितः, श्री ; गुण्टुरू (आन्ध्र.) :

359. अङ्कितम्, (क), २३. ३-४ (४२-४४).

डी. श्रीनिवास दीक्षितः, पं. ; नरसरावु पेटा (आन्ध्र.) :

360. चित्र-मन्दिरम्, (नि), २५. १ (५३-५६).

त्रिभुवननाथ पाठकः, श्री ; जोरहट (असम) :

361. संस्कृतरक्षणेन संस्कृतिरक्षा, (नि), १९. ३ (८५).

त्रिलोकचन्द्रः शास्त्री, श्री ; कादियां (गुरदासपुर, पंजाब) :

362. सद् विश्व-संस्कृतमिदं भुवि भातु भव्यम्, (प), ३. २ (११२-११३).
363. सदा भारतं भा-रतं भातु लोके, (प), ४. ३ (२६१).
364. भारत-विभूति-वन्दनम्, (प), ५. २ (१७२-१७४).

ददन उपाध्यायः, डा ; शोकहरा (बरौनी, बिहार) :

365. गुणालंकारयोर्भेदाभेदविमर्शः, (नि), २१. २ (४२-४४).
366. राजा सत्यसन्धः, (क), २१. ३-४ (१६-१९).
367. ध्वनिस्वरूपम्, (नि), २३. १ (५१-५५).
368. कलि-विडम्बनम्, (क), २३. ३-४ (११६-११८).

दयानन्द आर्यः, श्री ; होश्यारपुर (पंजाब) :

369. परोपकाराय सतां विभूतयः, (नि), १. २ (१८१, १७८).
370. वीर-भोग्या वसुंधरा, (नि), २. ४ (३७५-३७६).
371. पुराणम् इत्येव न साधु सर्वम्, (नि), ४. १ (७५-७७, ८९).

दयानन्दो भार्गवः, प्रा. ; दिल्ली :

372. जैनदर्शने हिंसायाः निरूपणम्, (नि), २. १ (१८-२६).

दामोदर झाः, डा. ; होश्यारपुर (पंजाब) ;

373. ग्रीष्म-सन्तापः, (प), ५. २ (१९५).
374. ज्यौतिष-विज्ञाने संस्कृत-वाङ्मयस्य योगदानम्, (नि), ७. ४ (२५५-२५९, २५४).
375. कालस्यौपनिषदं स्वरूपम्, (नि), ८. १-२ (७७-८१, ७५).
376. कोऽयं शाङ्करवेदान्तः, (नि), ८. ४ (९-११).
377. भारतीय-ज्यौतिषस्य स्वरूपम्, (नि), १२. १-४ (२७-३४).
378. ब्रह्मजिज्ञासा तत्प्रयोजनञ्च, (नि), १३. १-२ (२०-३३).
379. अध्यासविमर्शः, (नि), १३. ३-४ (३५-५१).
380. वैदिक-वाङ्मये भूसूर्ययोर्गति-विचारः, (नि), १४. १-२ (४५-४८).
381. शाङ्करवेदान्ते जीवेश्वरादिव्यवस्था, (नि), १५. १-२ (५५-६०).
382. शांकरवेदान्ते दृष्टिसृष्टिवादः सृष्टिदृष्टिवादो जीवेश-व्यवस्था च, (नि), १७. १-२ (१२-१४).
383. वेदान्त-सम्मताः पदार्थाः, (नि), १९. १. (५१-५५).
384. संस्कृतम्, (प), १९. ४ (१०).
385. संरक्ष्यं संस्कृतम्, (प), २०. ३-४ (८१-८२).
386. भूयाद् वसन्तोत्सवः, (प), २२. १ (२६).
387. अभिनव-सप्तपदी, (प), २२. ३-४ (२६).
388. शाङ्करवेदान्ते मोक्षमीमांसा, (नि), २४. १-२ (९-१४).

दामोदरदत्तः शास्त्री, श्री ; काहनूवान (गुरदासपुर, पंजाब) ;

389. अरे! द्रक्ष्यसि!, (ग-का), २३. २ (५६).
390. एकं संस्मरणम्, (क), २३. ३-४ (१०१-१०२).
391. सर्वः स्वार्थं समीहते, (क), २३. ३-४ (१०२-१०३).
392. एकः संन्यासी आगतः, (ग-का), २४. १-२ (५३).
393. आदर्शन्यायम्, (ना), २४. ३-४ (८७-९६).

दिवाकरदत्तः, आचार्यः ; शिमला (हि-प्र) :

394. **लाजपतराय-वचनामृतम्,** (प), ३. १ (८६).

दीनानाथशास्त्री "मधुपः", श्री ; जयपुर (राजस्थान) :

395. **प्रकीर्णाः,** (प), ३. ४ (३९४).

दीनेशचन्द्र शास्त्री, श्री, कलकत्ता (बंगाल) :

396. **भारतीयदर्शनेषु मनसः स्वरूपनिरूपणम्,** (नि), १. २ (१२३-१२५, १२०), १. ३ (२०८-२११), १. ४ (३५२-३५६).

दीवि श्रीनिवासदीक्षितः. श्री ; गुण्टूर (आन्ध्र.) :

397. **मुरली कूजति,** (प), १३. १-२ (३४).

दीवि. श्रीनिवासः दीक्षितः, पं, ; नरसरावु पेटा (आन्ध्र.) :

398. **नतिरियम्,** (गी), २२. ३-४ (९४).

399. **अपश्रुतिः,** (क), २३. ३-४ (२५-२८).

दुनीचन्द्र शास्त्री, पं. ; होश्यारपुर (पंजाब) :

400. **विगतं विमुंच वामे,** (प), १. १ (१८).

401. **'विधावुज्जिहानेऽप्यदभ्रा तमिस्रा'** (स-पू), १. ४ (३५०).

402. **पाञ्चनदी धरा विजयते,** (प), २. २ (१६९, १६८).

403. **विश्रुतयशाः पंचाप-पंचाननः,** (प), ३. १ (८१).

दुर्गादत्तशास्त्री विद्यालंकारः, श्री ; नलेटी (कांगड़ा, हि-प्र) :

404. **तृणजातकम्,** (ना), १९. ४ (४९-५८), २०. १ (३०-३८), २०. २ (३३-४३).

405. **छाया-विलासः,** (प), २२. ३-४ (११५-१२२).

406. **अनारकली,** (क), २३. ३-४ (१६-२१).

407. **रेलमन्त्री,** (ना), २४. ३-४ (८१-८६).

408. **स्वर्गीय-श्रीचारुदेवशास्त्रिणः,** (नि), २५. २-४ (१९१-१९५).

दुर्गादासः, रा. ब. ; दिल्ली :

409. **श्रद्धाञ्जलिः** (लाजपतरायं प्रति), (ग), ३. १ (९२-९३).

दुर्गादासः, पं. ; होश्यारपुर (पंजाब) :

410. श्रद्धाञ्जलिः (लाजपतरायं प्रति), (ग), ३. १ (१०५-१०७).

दुर्गादास गोस्वामी, प्रा. ; कलकत्ता (बंगाल) :

411. सुरभारती, (प), ६. २-३ (१४९-१५०).
412. महात्माष्टकम्, (प), ७. ३ (१९५-१९६).
413. भवभूति-प्रशस्तिः, (प), १०. १-४ (९५-९७).
414. शङ्कराचार्यप्रशस्तिः, (प), १३. १-२ (७०-७५).

देवदत्तभट्टिः, प्रा. ; मालेरकोटला (पंजाब) :

415. संस्कृत-साहित्ये विश्व-बन्धुत्वम्, (नि), ६. १ (७३-७६).
416. पठितः पाठः, (ग-का), १८. ३ (६०).
417. आत्मबोधः, (ग-का), १९. ३ (८४).
418. महर्षेः शिक्षापद्धतिः, (नि), २०. ३-४ (९२-९४).
419. नव-वर्षाऽभिनन्दनम्, (प), २१. १ (१).
420. काश्चन-कविताः, (ग-का), २१. २ (३१).
421. अहो बलवतां कर्म !, (प), २१. ३-४ (९२).
422. देवोऽदेवो वा, (ग-का), २२. ३-४ (२०).
423. युगपुरुष-प्रतीक्षा, (ग-का), २२. ३-४ (२०-२१).
424. कलियुगम्, (ग-का), २३. १ (२२).
425. पुनरावृत्तिः ?, (ग-का), २३. १ (२३).
426. नरनगरे, (ग-का), २३. १ (२३).
427. सिकन्दर-शतम्, (ग-का), २३. १. (३०).
428. सांस्कृतिक-प्रणिधयः, (क), २३. ३-४ (३३).
429. आशीविषः, (ग-का), २४, १-२ (९३-९४).

देवासकरः, श्री ; वरानपुरा, बड़ौदा (गुजरात) :

430. अक्षय्यवटवृक्षो नः, (प), १७. ५ (२).

देवीदत्त शर्मा/डी. डी. शर्मा, डा. ; चण्डीगढ़ :

431. वृष्टेद्वे रूपे, (प), १. ४ (३३८-३३९).
432. भारत-शौर्यम्, (प), ५. १ (६४-६५).

433. भवभूतिम् अनादृत्य मुरारिम् उररीकुरु, (नि), ९. १-२ (३५-४२).
434. व्यावहारिक-भाषात्वेन संस्कृते नूतनः प्रकाशः, (नि), १८. २ (३-१०).
435. किन्नर-संस्कृतम्, (नि), २१. ३-४ (९-१५).

देशराज शर्मा, डा. ; ढलियारा (कांगड़ा, हि-प्र.) :
436. आदिकाव्यरामायणे धातूनां पदव्यत्ययसम्बन्ध्यनियमितता, (नि), २१. २ (२-८), २१. ३-४ (६५-६७).
437. आदिकाव्येऽपाणिनीयानि क्रियारूपाणि, (नि), २५. २-४ (११६-१२६).

देशराज-स्वामी, श्री ; दिल्ली :
438. कर्तव्य-पालको लाजपतरायः, (नि), ३. १ (८८-८९).

धनराजः, डा. ; होश्यारपुर (पंजाब) :
439. स्वात्माराम-योगीन्द्र-रचिता वर्णदीपिका, (सम्पादिता), (प), १७. १-२ (१५-२०).

धर्मदेवो विद्यामार्तण्डः, श्री ; ज्वालापुर (उ-प्र) :
440. समाजसेवी लाजपतः, (नि), ३. १ (६०-६१).
441. स्वराज्यं सुराज्यं कदा वै भवेन् नः ?, (प), ४. ३ (२८०).

धर्मवीरः एम. ए., श्री ; ज्वालापुर (उ-प्र) :
442. लाजपतस्य कला-प्रियता, (नि), ३. १ (९०).

धर्मानन्द शर्मा, डा. ; होश्यारपुर (पंजाब) :
443. भौतिक-विज्ञान-वल्लरी, (प), २२. ३-४ (१३-१४).
444. देवानां प्रियः, (क), २३. ३-४ (११०-११२).
445. निरुक्तस्य प्रामाण्यम्, (नि), २५. २-४ (१३८-१४०).

धर्मेन्द्रकुमार गुप्तः, डा. ; अम्बाला (हरियाणा)/पटियाला (पंजाब) :
446. विदेशेष्वस्माकं संस्कृतेः संस्कृतस्य च प्रसारः, (नि), १. ३ २२७-२३३).

447. **दण्डिनः पदलालित्यम्**, (नि), ४. २ (१४७-१५१, १५९).
448. **गुणाढ्यस्य बृहत्कथा**, (नि), ५. १ (११-१७, २८).
449. **संस्कृत-काव्यशास्त्रपरम्परायां दण्डिनः स्थानम्**, (नि), ७. १-२ (५४-६१, ६८).
450. **महाकविकालिदासस्य जीवनदर्शनम्**, (नि), १५. १-२ (८८-९२).
451. **'पतञ्जलिकृतं व्याकरण-महाभाष्यम्'** (प्रा. वेदप्रकाश विद्यावाचस्पतिना सम्पादितं हिन्द्या व्याख्यातं च), (पु-स), १७. १-२ (८७-८८).
452. **'वाणी-विलसितम्'**, (श्री-किशोरनाथझा-श्री जगन्नाथ पाठक-सम्पादितम्), (पु-स), १९. २ (६१-६४).
453. **'कापिशायनी'** (डा. जगन्नाथपाठक-कृता), (पु-स), १९. ३ (८६-८८).
454. **महर्षिदयानन्दकृतो मोक्षविमर्शः**, (नि), २०. ३-४ (१७-२१).
455. **'रति-मन्मथ-नाटकम्'** (डा. जगन्नाथपाठक-सम्पादितं), (पु-स), २०. ३-४ (१२४-१२६).
456. **'भाति मे भारतम्'** (श्री-रमाकान्त शुक्ल-कृतं), (पु-स), २०. ३-४ (१२६-१२७).
457. **'कुटुम्बिनी'** (श्री-लछमनसिंह-अग्रवाल-कृता), (पु-स), २०. ३-४ (१२८).
458. **आचार्य-वामनस्य रीतिसिद्धान्तः**, (नि), २१. ३-४ (२०-२९).
459. **'श्री गुरुनानकदेव-चरितम्'** (पं. विष्णुदत्तशर्म-कृतं), (पु-स), २२. १ (५९-६०).
460. **'मृद्वीका'** (श्री-जगन्नाथपाठक-कृता), (पु-स), २२. १ (६१-६३).
461. **'श्रीमद्भागवतभाषा-परिच्छेदः'** (डा. चारुदेवशास्त्रि-कृतः), (पु-स), २२. २ (६२-६४).
462. **'ऋतुचक्रम्'** (डा. श्यामदेवपाराशर-कृतम्), (पु-स), २३. १ (५८-६०).
463. **मुनिगणिकीया कथा**, (क), २३. ३-४ (२२-२४).
